## अन्धश्रद्धाविनाशाय । १५/०६/२०१०

### १) मानवस्य विशेषत्वम् -

आहारनिद्राभयमैथुनं च
तद्वच्च कामादिविकारभावाः ।
सर्वेषु जीवेषु समास्तथापि
मनुष्यमात्रे प्रबला भवन्ति ।।१

विचारशक्तिस्त्रिविधा च बुद्धिः
निसर्गदत्ता मनुजस्य सम्पद् ।
एतैर्विकारैश्च तथा च सम्पदा
जीवेषु सर्वेषु नरो विशेषः ।।२

### २) मानवस्य समस्या -

अनेन तृष्णा विविधास्तथेच्छाः
चित्ते मनुष्यस्य समुद्भवन्ति ।
फलन्ति सर्वा न पुनर्यथेष्टं
तथा च घोरं ग्रसते भयं तम् ।।३

## अन्धश्रद्धानिर्मूलनार्थ - १५/०६/२०१०

### १)मानवाची वैशिष्ट्ये –

आहारनिद्राभयमैथुनादि
तसेच कामादि विकारभाव
समस्त प्राण्यांत सदा समान
मनुष्यप्राण्यात तथापि तीव्र ।।१

विचारशक्ती, त्रिविधा नि बुद्धी
निसर्गदत्ता मनुजास संपदा
अशा विकारें, आणि संपदेने
सर्वांहि प्राण्यात मनुष्य श्रेष्ठ ।।२

### २) मानवांपुढील समस्या –

तथापि याने सुचती सदैव
इच्छा नि तृष्णा मनुजास नाना
परंतु साऱ्याच पुऱ्या न होती
भयेहि नाना छळिती तयास ।।३

## FOR THE ERADICATION OF SUPERSTITIONS

### 1) Speciality of man –

1) Instincts like eating, sleep, fear, mating and weaknesses like passion etc. are common to all beings, but they are stronger in human beings.

2) Man is gifted by Nature with the capacity to think and threefold talent. With this wealth and the abovementioned instincts and weaknesses man happens to be a special species in thisworld

### 2) Problems before man –

3) On account of these special features, numerous desires and ambitions arise in the mind of man. But all of them are not fulfilled; besides tremendous frights and anxieties harass him.

बुद्ध्या सह नरेणाप्ता कल्पनाशक्तिरद्भुता ।
तथा कल्पकताशक्तिरप्रमेया निसर्गतः ।।४

अपूर्व कल्पनाशक्ती, भव्य कल्पकता तशी
यांचीही देणगी त्याला निसर्गाने दिली असे ।।४

4) Along with talent man is has got abnormal power of imagination and unique ingenuity.

अपरेष्वपि जीवेषु शक्तिद्वयमिदं स्थितम् ।
विपदावेव तैरस्य प्रयोगस्तु विधीयते ।।५

शक्ती या असती प्राप्त प्राण्यांनाही नरेतर
क्वचित् विपत्तीसमयी त्यांचा वापर करीत ते ।।५

5) The non-human beings too may have these powers but they perhaps use them only in emergencies.

आभ्यामपूर्वशक्तिभ्यां नरो लेभे सुखं भयम् ।
मानवेतरजीवेषु तादृशं यन्न दृश्यते ।।६

अपूर्व शक्ती या देती मानवां सुख-दुःखही
मानवेतर प्राण्यांत स्थिती ऐशी न आढळे ।।६

6) With these powers man enjoys pleasures and also suffers from some fears, which other beings perhaps do not.

कृषिवास्तू वस्त्रयाने गणितं वैद्यकं तथा ।
विद्युद्रसायने चैव खगोलं चाभियान्त्रिकी ।।७

कृषी, वास्तू, वस्त्र, यान, वैद्यकी, अभियांत्रिकी
विद्युत्, गणित, भूगर्भ, जीवशास्त्र, खगोलही ।।७

एतादृशेषु शास्त्रेषु नवनिर्मितिरद्भुता ।
विहिता या मानवेन सा तत्कल्पकताफलम् ।।८

अशा क्षेत्रीं मानवाने साधली नवनिर्मिती
भव्य कल्पकता-शक्तीचे हे त्याच्या असे फळ ।।८

7& 8) Whatever innovation man has achieved in the fields of agriculture, architecture, textiles, vehicles, mathematics, medical treatment, electricity, chemistry, astronomy, engineering and so on, is all due to his power of ingenuity.

मानवेतरजीवान् यद्भयं न परिबाधते ।
कल्पनाजनितेनैव, मानवस्तेन बाध्यते ।।९

मानवेतर प्राण्यांना जी भये नच माहिती
कल्पनाजन्य त्या भीती मानवांना पछाडती ।।९

9) At the same time, man suffers from certain fears which arise only through his imagination and which probably do not haunt non-human beings.

अपहर्तुं भयं चेदं, काङ्क्षानां पूर्तये तथा ।
उपायं निश्चितं नासावजानात् बुद्धिमानपि ।।१०

### ३) मानवेन चिन्तितः उपायः-

अतः संकल्पना तेन कृता देवस्य यत्नतः ।
पूरयेत् तस्य कामान् यस्तथा सर्वभयं हरेत् ।।११

पूरयत्वीश्वरः कामान् भयं च हरतामसौ ।
हेतुनाऽनेन तेनास्मै प्रदत्ता बहवो गुणाः ।।१२

### ४) मानवेन कल्पितस्य ईश्वरस्य स्वरूपम् –

सर्वज्ञत्वं समानत्वं सामर्थ्यं सकलं तथा ।
सर्वसाक्षित्वमेवं च स्थायित्वं सर्वतस्तथा ।।१३

चराचरस्य विश्वस्योत्पत्तिस्थितिलयस्य च ।
एकमेवाद्वितीयः स कर्तेत्यपि च कल्पितम् ।। १४

भयमुक्ती हेतुपूर्ती साधावी कोणत्या परी
हे न निश्चित ठावे यां नरां प्रज्ञा असूनही ।।१०

### ३) मानवाची उपाययोजना –

म्हणोनि ईश्वरी शक्ती त्याने बुद्ध्याच कल्पिली
जिने हरावी भीति अन् करावी हेतुपूर्तता ।।११

'इच्छापूर्ती करो देव, भयही आपुले हरो'
यासाठी मानवे त्याला दिधले गुण अद्भुत ।।१२

### ४) मानवाने कल्पिलेले ईश्वराचे स्वरूप –

सर्वज्ञत्व, समानत्व, सर्व सामर्थ्यसंपदा
सर्वसाक्षित्व, सर्वत्र अस्तित्वहि असो तया ।।१३

या चराचर विश्वाची उत्पत्ती, स्थिति वा लय
यांचा कर्ता एकमेव तोच ऐसेही कल्पिले ।।१४

10) Man, intelligent as he is, did not know for certain, ways to overcome these fears or to fulfill his desires.

### 3) **<u>Remedy invented by man -</u>**

11) So man thought of the idea of god, who would allay his concerns and fulfill his desires

12) And man empowered this (invented) god with qualities with which he should be able tofulfill his desires and remove his fears.

### 4) **<u>Features of god as contemplated by man</u>**

13) It was imagined that god is, omniscient oomnipresent, omniwitness, just and equal to all,

14) That he is the only architect of the creation maintenance and destruction of the Universe.

दयालुः सर्वभूतात्मा सर्वभूतहिते रतः ।
प्राणदः सर्वभूतानां शक्तिदो बुद्धिदस्तथा ।।१५

दयाळू, सर्वभूतात्मा, सर्वभूतहिती रत
सर्वभूतप्राणदाता, शक्तिबुद्धिप्रदायक ।।१५

15) That he is kind, the soul in all beings, giving life and strength and talent to them all, and interested in the welfare of them all.

भक्त्या स्तुत्या पूजया च तपोयज्ञजपादिभिः ।
प्रसन्नं शक्नुयात् कर्तुं देवं तच्छरणागतः ।।१६

पूजने,स्तुतिभक्तीने, तपोयज्ञे, जपादिके
प्रसन्न भगवंताला शरणार्थी करू शके ।।१६

16) That anybody who seeks his resort could gratify him by means of devotion, praise,worship, penance, sacrifices, and reiteration of his name.

दुष्टाचारविचारैश्च तथोच्चारैश्च प्राणिनाम् ।
स एव कुपितस्तेभ्यो दण्डं दद्याद्यथोचितम् ।।१७

जर कोणी करी निंद्य विचारोच्चारवर्तन
क्रुद्ध होउनि त्याला तो करी उचित शासन ।।१७

17) That he would get angry with bad thoughts bad utterences and bad behavior of beings and punish them with suitable penalty.

अनादिरेषोऽनन्तश्च निराकारश्च निर्गुणः ।
तथापि रूपं चाकारं यथेच्छं धारयेत् गुणान् ।।१८

आदि नाही, अंत नाही, गुण वा रूपही न त्या
परी इष्ट गुणांरूपां स्वेच्छे धारण करू शके ।।१८

18) That he is without a beginning or an end, he is devoid of any form or qualities. But he can assume any form and qualities at will.

परमात्मा परब्रह्म भगवान् प्रभुरीश्वरः
इत्यादीन्यभिधानानि देवायास्मै नरो ददौ ।।१९

परमात्मा, परब्रह्म, भगवान्, प्रभु, ईश्वर
अशी अनेक नावे त्या ईश्वरा दिधली नरे ।।१९

19) This god was called by like‘Prabhu’, ’Paramatma’, ’Parabrahma’,‘Bhagwan’ ’Paramatma’ etc.

एवंगुणविशिष्टस्य रम्या देवस्य कल्पना ।
स्वीकृता सत्यमेवेति शनैश्च बहुभिर्जनैः ।।२०

देवाची कल्पना ऐशी, एवंगुणविशिष्ट त्या
हळू हळू मान्य झाली, कालौघात जगी जनी ।।२०

20) This pleasant fantacy of god endowed with such qualities was slowly accepted as ‘The truth’ by the majority of people.

**५) ईश्वरविषयकस्य सत्यस्य विस्मृतिः -**

देवो नाम कृता काचित् नरैः स्वार्थाय कल्पना ।
इति सत्यं तु दुर्योगात् जनानां विस्मृतिं गतम् ।।२१

**६) जनमानसे ईश्वरकल्पनायाः प्रभावः -**

ततो देवस्य कर्तृत्वं लीलाश्च विविधास्तथा ।
कल्पयित्वा पुराणेषु कथाकाव्येषु वर्णिताः ।।२२

श्रुत्वा पठित्वा देवस्य नानालीलास्तदा नरः ।
स्वकामपूर्तये तस्याराधनां स प्रचक्रमे ।।२३

**७) सत्यसङ्गिनां पक्षः -**

सत्यप्रियाणां तु जनोत्तमानां
देवः स वा तस्य गुणा न मान्या : ।
'तर्केण प्रत्यक्षप्रमाणतश्च
नैतस्य सिद्धिर्भवती'ति ते विदुः ।।२४

**५) ईश्वरविषयका सत्याची विस्मृती –**

स्वार्थासाठी नरे केली देवाची कल्पना अशी
या सत्याची परी लोकां जाहली विस्मृती पुरी ।।२१

**६) जनमानसावर ईश्वरकल्पनेचा प्रभाव –**

मग कर्तृत्व देवाचे, लीला, शाप तसे वर
कल्पूनिया कथाकाव्यपुराणांतून वर्णिले ।।२२

वाचुनी ऐकुनी ऐशा लीला अद्भुत ईश्वरी
तयाच्या भजनी लागे इच्छा पुरविण्या नर ।।२३

**७) सत्यवाद्यांचा पक्ष –**

तथापि सत्यप्रिय बुद्धिवंता
तो देव,त्याचे गुण वा न मान्य
त्यांच्या मते ते नच सिद्ध होती
प्रत्यक्ष वा तर्कप्रमाणयोगे ।।२४

**5) The truth about god forgotten-**

21) The truth that god was imagined by man to fulfill his selfish ends was soon lost on the people.

**6) The influence of the idea of god on the people-**

22) Gradually fictitious accounts of the creativity and the exploits of god were described in stories, poems and scriptures.

23) After reading and listening to the exploits of god, man began to propitiate god to satisfy his cravings.

**7) Stand of the lovers of truth –**

24) But the concept of god or the virtues attached to him were not acceptable to the best of people who loved truth. They argued that the idea of god does not stand when tested by the evidence of 'Perception' or 'Inference'.

सर्वेषु भूतेषु समो दयालुः
आसीत् स देवो यदि सत्यमेव ।
रूपैर्विभिन्ना विषमा गुणैश्च
देवेन जीवा जनितास्तु कस्मात् ? २५

कोऽपि गौरो कोऽपि कृष्णो कोऽपि स्थूलः कृशोऽपरः ।
प्रांशुः कश्चिद्वामनोऽन्यः कोऽपि मन्दः सुधीः परः ।।२६

अयं शूरो भीरुरेष वक्ताऽयं मूक एष वा ।
सुरूपः सबलः कश्चिद्विरूपो दुर्बलोऽपरः ।।२७

सर्वेऽप्येकेन देवेन यदि जीवा विनिर्मिताः ।
कुतः पुनरिमे भेदास्तेन जीवेषु निर्मिताः ? २८

जनुषा बधिरोऽन्धो वा कथं जीवः प्रजायते ?
केषांचिदपमृत्युर्वा जीवानां जायते कुतः ? २९

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनां ।
लुब्धकधीवरपिशुना निष्कारणवैरिणः कथं कस्मात् ?३०

जगातले या जर सर्व जीव
खरेच देवा असती समान
रूपागुणांनी अगदी विभिन्न
असे कसे तो घडवील जीव ?२५

कुणी गोरा, कुणी काळा, कुणी स्थूल, कुणी कृश
उंच कोणी, खुजा कोणी, प्राज्ञ कोणी, कुणी खुळा ।।२६

शूर कोणी, कुणी भीरू, वक्ता वा मुखदुर्बळ
सशक्त देखणा कोणी, कुरूप दुबळा दुजा ।।२७

जर एकाच देवाने निर्मिले जीव सर्वही
तर हे भेद का कैसे तयाने निर्मिले असे ?२८

जन्मांध, बहिरी, पंगू बालके जन्मती कशी ?
जीवांचे अपमृत्यू वा घडतात कशामुळे ?२९

तृण-जल-संतोषांनी तुष्टां मृग-मीन-सज्जनां छळिती
कोळी,व्याध नि दुर्जन निष्कारण कासया जगामाजी ? ३०

25) "If god were indeed just and kind in reality, why did he create beings differing in respect of form and qualities ?" They asked.

26) One is fair, the other is dark, one fat, the other lean, one tall, the other short, one intelligent while the other, dull by wit !

27) One brave, the other coward, one orator, another dumb, one handsome and strong, while the other ugly and weak !

28) If all beings were created by one god, why did he make such distinctions among them ?

29) How is a being blind or deaf by birth born at all ? Why are some beings subjected to premature death ?

30) What is the justification for the hunters, fishers and the villains who torture for no reason innocent animals, fish and good people subsisting on grass, water and content ?

दुष्टाः सुखेन जीवन्ति सतां दुःखेन जीवनम् ।
न्यायः को नाम देवस्य विद्यते यदि स क्वचित्।।३१

सुखाने जगती दुष्ट, सज्जनां मात्र यातना
हा कसा न्याय देवाचा ? असेल जर तो कुठे ! ३१

31) The villains live happily, while the good people lead a miserable life. What is the justice of god (in this) if at all he exists?

### ८) नास्तिकमते सृष्टिवैषम्यस्य स्पष्टीकरणम् –

### ८) नास्तिकांच्या मते सृष्टीतील विषमतेचे स्पष्टीकरण –

### 8) **The explanation of the atheists for the *Vaishamya*** –

'वैषम्यं' युज्यते शब्दो 'ह्यसमत्व'निदर्शने ।
नास्तिकास्त्ववगच्छन्ति पदमर्थान्तरेण तद् ।।३२

'वैषम्य' योजिती शब्द 'असमत्व' निदर्शना
तथापि वेगळ्या अर्थी घेती नास्तिक शब्द तो ३२

32) The term *'Vaishamya'* is used to denote the inequality; but the atheists understand it differently.

नास्तिकास्तत्र मन्यन्ते 'विषये चात्रप्रस्तुते ।
वैविध्यं सृष्टिसंभूतं पदं तद् बोधयत्वि'ति ।।३३

नास्तिकांचे मते येथे वर्ण्य त्या विषयामधे
'सृष्टिसंभूत वैविध्य' शब्द हा दाखवीतसे ३३

33) In this context the atheists think that as far as the current topic is concerned, may the word indicate *'variety in the Nature.'*

नास्तिकाः सृष्टिवैषम्यं स्पष्टीकुर्वन्ति तत्त्वतः।
निसर्गनियमा एव तत्र हेतुर्न हीश्वर : ।। ३४

सृष्टीमधील वैषम्य नास्तिकांच्या मते असे
निसर्गाचे रूप मात्र, तया देव न कारण ।। ३४

34) The atheists explain the 'inequality' in the world as the varities in nature, which result from the laws of Nature & which have nothing to do with god.

यथा बीजाच्च भूमेश्च गुणरूपा वनस्पतेः ।
परिस्थितिस्वभावाभ्यां भेदा जीवगतास्तथा ।।३५

संयोगे बीज-भूमीच्या रोपाला गुणरूप ये
परिस्थिति-स्वभावाने भेद जीवांतरी तसे ।।३५

35) Just as the form and property of a plant are a joint result of the seed and the soil, so are the differences in the beings owing to their innate qualities and the environment.

## ९) आस्तिकानां कर्मसिद्धान्तेन स्पष्टीकरणम् -

आस्तिका देवसिद्ध्यर्थं वैषम्यं वस्तुवस्तुषु ।
सुखदु:खं तथा लोके स्पष्टीकुर्वन्ति त्वन्यथा ।।३६

गुणरूपस्वभावानां वर्तमानपरिस्थितेः ।
पूर्वकर्म हि जीवानां ध्रुवं भवति कारणम् ।।३७

यत्कर्म कुरुते जीवः सदसद् तत्फलं तथा ।
जन्मान्तरेऽथ वा तस्मिञ्जन्मन्येवायमश्नुते ।।३८

म्रियेत यदि जीवस्तु न भुक्त्वा कर्मणः फलम् ।
तदेव भोक्तुं जायेत लोकेऽस्मिन् स पुनर्ध्रुवम् ।। ३९

जन्मकर्ममृतेः पश्चाद् भोक्तुं तत्कर्मणां फलम् ।
जायते हि पुनर्जीवो चक्रमेतन्निरन्तरम् ।। ४०

## ९) आस्तिकांचे कर्मसिद्धांताद्वारे स्पष्टीकरण -

जीवांची गुणरूपे अन् सुखदु:खादिबद्दल
मीमांसा करिती भिन्न, देवसिद्ध्यर्थ नास्तिक ।।३६

स्वभाव, गुणरूपादि जीवांचे अन् परिस्थिती
पूर्व वा प्राप्त जन्मीच्या कर्मांनी होत निश्चित ।।३७

बरे-वाईटसे कर्म करतो जीव जीवनी
तसे फळ तया लाभे त्या जन्मी अथवा पुढे ।।३८

जर जीवास ये मृत्यू न कर्मफल भोगता
पुनश्च जन्मतो जीव या लोकी तेच भोगण्या ।।३९

जन्म-कर्म-मृती, पुढती कर्मांचे फळ भोगण्या
पुनर्जन्म, पुन्हा कर्म, चक्र ऐसे निरंतर ।।४०

## 9) <u>Explanation of the theists by way of Karma theory</u> –

36) But the theists explain the inequalities among things, as well as the pleasure & pain in this world differently, in order to prove the existence of god.

37) The previous actions of the beings is certainly the sole cause of their forms, qualities and temperaments .

38) The being reaps the fruit of its own good or bad deed, in the present or future birth.

39) If a being dies without reaping the fruit of its deed, it will be born again in this world to do so.

40) Thus, a being, after its birth, action and death is born again, to reap the fruit of its actions. This is an unending cycle.

### १०) नास्तिकानामाक्षेपः -

आद्यजन्मनि जीवस्य पूर्वजन्म न विद्यते ।
पूर्वस्य जन्मनोऽभावात्पूर्वकर्म न किञ्चन ।।४१

पूर्वकर्मफलाभावात् रूपं जीवस्य वा गुणाः ।
निश्चीयन्ते कथं तस्य जन्मनि प्रथमे पुनः ? ४२

### ११) आस्तिकानां प्रतिवादः -

इति पृष्टे विजानीयादाद्यजन्म न किञ्चन ।
कस्यापि जन्मनः पूर्वं जन्म जीवस्य विद्यते ।।४३

बिन्दूनां वर्तुलस्थानामाद्यबिन्दुर्न विद्यते ।
तथैव जन्मचक्रेऽपि नाद्यजन्मेति किञ्चन ।। ४४

'नैव कर्म करोमी'ति न कश्चिद्वक्तुमर्हति ।
जीवनं कर्मरहितं न शक्यमवनीतले ।।४५

### १०) नास्तिकांचा आक्षेप –

जीवाच्या आद्यजन्माच्या पूर्वी जन्म असंभव
अभावे पूर्वजन्माच्या पूर्वकर्म न, ना फल ।।४१

आद्यजन्मात नसता कर्माचे भोगण्या फल
गुणरूपादि जीवांचे त्या जन्मी ठरते कसे ?४२

### ११) आस्तिकांचे उत्तर –

आद्यजन्म असा काही अस्तित्वात नसे जगी
जन्माआधी कोणत्याही पूर्वजन्महि निश्चित।।४३

परीघस्थित बिंदूत आद्यबिंदू जसा नसे
तसाच जन्मचक्रात आद्यजन्म असा नसे ।।४४

'करणार न मी़ कर्म' , कोणीहि न वदू शके
कर्माविणे न जगती जीवमात्र जगू शके ।।४५

### 10) **The objection of the atheists to this theory** -

41) There cannot be a previous birth to the first or the initial birth of a being. In absence of a previous birth, there cannot be any previous deed too.

42) How are then, the form and the qualities of a being decided in its initial birth, in absenceof any previous deed or a fruit thereof ?

### 11) **The rejoinder of the theists** –

43) If such a question is raised, it should be noted that there is nothing like an initial birth. Every birth has some birth before it.

44) Just as no point on the circumference of a circle, can be called the starting point, similarly no birth is initial or first in the cycle of births

45) Nobody can resolve,"I shall commit no deed"; for life without an action is simply impossible in this world.

सच्चासच्चास्ति जीवस्य द्विविधं कर्म भूतले।
धर्माधर्मस्वरूपं तत् पुण्यपापे च तत्फले ।।४६

पुण्येन स्वर्गं गच्छन्ति पापेन नरकं जनाः ।
क्षीणे पुण्ये च पापे च जायन्ते ते क्षितौ पुनः ।।४७

निष्कामकर्माचरणं यदि कर्तुं क्षमो नरः ।
जन्ममृत्युपुनर्जन्मचक्रान्मुक्तो ध्रुवं भवेत् ।।४८

देहाद्भिन्नस्तु तस्यात्मा न तावेकौ मनागपि ।
चैतन्यं यत्तु जीवेषु तदेवात्मेति ज्ञायते ।।४९

यतोऽनादिरनन्तश्च जीवात्माऽयं सनातनः ।
जायते म्रियते देहो न तदात्मा कदाचन ।।५०

स्फुलिङ्गोंऽशो यथा वह्नेस्तथा ऽऽत्मा परमात्मनः ।
आब्रह्मस्तम्बपर्यन्तं येन विश्वमिदं ततम् ।।५१

कर्म द्विविध, जीवांचे जगती या भलेबुरे
धर्माधर्म तया नावे पुण्यपाप तयां फळे ।।४६

पुण्ये लाभे स्वर्ग जीवां, पापे नरक लाभतो
सरता पुण्य वा पाप, जन्मे जीव जगी पुन्हा ।।४७

निष्कामकर्माचरणा जर जीव करू शके
जन्म-मृत्यु-पुनर्जन्म-चक्रातून सुटेल तो ।।४८

देह आणिक आत्मा हे असती वेगवेगळे
देहामधील चैतन्या आत्मा म्हणती आस्तिक ।।४९

आदि-अंत नसे आत्म्या, असे आत्मा सनातन
जन्मतो. मरतो जीव, आत्मा नाही कधीच तो ।।५०

निर्मिले परमात्म्याने आब्रह्मस्तंब विश्व हे
परमात्मांश जीवात्मा, जसा स्फुल्लिंग अग्नीचा ।।५१

46) The deeds of a being are twofold – good and bad, or Dharma and Adharma and they result in merit and evil respectively.

47) With merit people go to heaven, and with evil to hell. On the extinction of merit and evil, they are born again on the earth.

48) If at all a person is able to do deeds without expecting a fruit, he shall certainly beliberated from the cycle of birth, death & rebirth.

49) Soul is different from the body; the two are not at all identical. The life-force in a body is the soul.

50) As the soul is without a beginning or an end, it exists for ever. What is born and dead is a body and not the soul.

51) Just as a spark is the essence of fire, so is the soul an essence of the Highest Self, that has created the universe from the straw to Brahman.

## १२) अत्र नास्तिकानां मतम् -

चतुरा बुद्धिमन्तस्ते यैस्ततं जालमीदृशम् ।
निराधारं तथाप्येतत् विश्वासं जातु नार्हति ।।५२

वेदोपनिषदो गीता ब्रह्मसूत्राणि वै तथा ।
महाधारोऽपि तस्येति वाङ्मयं चैतदुच्यते ।।५३

जैनबौद्धदिशास्त्राणामेतत् किन्तु न संमतम् ।
लोकायतिकचार्वाकैस्तथैवेदं निराकृतम् ।।५४

न सर्वमान्यं न ग्राह्यं मतं तद् भारतेऽप्यहो ।
शब्द एव तदाधारः प्रमाणत्वं स नार्हति ।।५५

बुद्धिनिष्ठा नरश्रेष्ठा अल्पसंख्यास्तु यद्यपि ।
तर्केण ते परीक्षन्ते जालमेतद् सुयोजितम् ।।५६

## १२) यावर नास्तिकांची प्रतिक्रिया -

ज्यांनी हे रचिले जाळे, ते हुषार महामती
तर्कसंगत किंवा ते, विश्वासार्ह मुळी नसे. ।।५२

वेदोपनिषदे गीता, ब्रह्मसूत्रादि वाङ्मय
आधार या विचाराचा मोठा म्हणुनि मानती ।।५३

जैन बौद्धादि शास्त्रांना परि संमत तो नसे
लोकायतिक चार्वाक यांनीही तो झुगारला ।।५४

सर्वमान्यत्व नाही त्या भारतातहि ग्राह्यता
शब्द हाचि तदाधार प्रमाणच नसे मुळी ।।५५

बुद्धिनिष्ठ परी ज्ञाते संख्येने अल्प ते जरी
करिती या विचारांचे बुद्धिनिष्ठ परीक्षण ।।५६

## 12) <u>Opinion of atheists in this regard</u> –

52) Those who knit this net are clever and talented, but the net is baseless and not reliableat all.

53) The literature like Vedas, Upanishads, Bhagwadgita and Brahmasutras is said to be the grand evidence of this theory.

54) But it is not acceptable to theories like Jain and Bauddha. Similarly it has been thrashed by Charvakas and Lokayatikas also

55) So this theory is not accepted even in India; for ‘statement’ is its base and it does not deserve to be accepted as an evidence.

56) The great rationalists, though few in number, examine this well-knit network by the test of inference.

## १३) प्रत्यक्षप्रमाणं च अनुमानप्रमाणं च –

इन्द्रियैर्वस्तुजातं यत्प्रत्यक्षमवगम्यते ।
नापेक्षते प्रमाणं तत् किमप्यन्यत् स्वसिद्धये ।।५७

एतत् प्रमाणं प्रत्यक्षं सर्वाधीनमनन्वयम् ।
मौलिभूतं प्रमाणानां सर्वेषां सर्वसंमतम् ।।५८

इन्द्रियैर्नावगम्यन्ते सर्ववस्तूनि सर्वदा ।
अनुमानप्रमाणेन ज्ञायन्ते तानि मानवैः ।।५९

गोलाकारो ग्रहाणां च भ्रमणं परितो रवेः ।
ज्ञायते ह्यनुमानेन 'पर्वतो वह्निमान्' यथा ।।६०

## १४) प्रत्यक्षप्रमाणविषये शङ्का-

यथेन्द्रियाणि सर्वेषां समं कार्यक्षमाणि न ।
कुतः कस्येन्द्रियज्ञानं प्रमाणमिति गृह्यताम् ?६१

## १३) प्रत्यक्षप्रमाण व अनुमानप्रमाण –

इंद्रियें वस्तुजाताचा बोध प्रत्यक्ष होत जो
पुरावा अन्य ना लागे त्याते सिद्ध करावया. ।।५७

असे प्रमाण प्रत्यक्ष, सर्वां प्राप्य, अजोडही
मुख्य साऱ्या प्रमाणांत मान्य सर्वांस सर्वथा ।।५८

साऱ्या वस्तू न कळती इंद्रियांनीच सर्वदा
अनुमानप्रमाणे त्यां जाणे मानव तेधवा ।।५९

गोलाकार ग्रहांचा वा त्यांची सूर्यप्रदक्षिणा
जाणिती अनुमाने त्यां 'पर्वती अग्निला' जसे ।।६०

## १४) प्रत्यक्षप्रमाणाविषयी शंका –

ज्ञानेंद्रियेही सर्वांची कार्यक्षम न सारखी
इंद्रियज्ञान कोणाचे समजावे प्रमाणवत् ? ६१

## 13) <u>Evidences of Perception and Inference</u> -

57) Anything that is perceived by sense-organs does not need any other evidence for proving its existence.

58) This unique evidence of Perception is accessible and acceptable to all, and it stands supreme among all evidences.

59) But all things cannot always be perceived by the sense-organs. Then they are known by the evidence of inference, by human beings.

60) The round shape of planets and their revolution around the sun are known by inference like " the fire on the mountain".

## 14) <u>A doubt regarding the evidence of Perception –</u>

61) As the sense-organs of all persons are not equally efficient, whose perception could be accepted as the evidence ?

तथा हि केचित् द्रष्टारः क्षमा यद् वीक्षितुं परम् ।
प्रभवन्ति न सामान्या जना द्रष्टुं तथैव तद् ।।६२

‘कथमेतत् परं ज्ञानं प्रत्यक्षमिति नोच्यते ?
पूर्वग्रहा नेदृशाः किं सत्यान्वेषणबाधकाः ?’ ६३

**१५) शङ्कायाः निरसनम् -**

एवं पृष्टे वयं ब्रूमः ‘नात्र पूर्वग्रहः क्वचित्
तथापि करणीयोऽत्र तर्कमात्रेण निर्णयः’ ।।६४

यदेकेन यथा दृष्टं परं भवतु वा न वा।
तत् तु तस्य कृते सत्यं ध्रुवमत्र न संशयः ।।६५

अदृष्ट्वैव कथं ग्राह्यं सत्यत्वेन तु तत् परैः ?
‘अदर्शनात् हि तत् सत्य’मिति वक्तुं न युज्यते ।।६६

ईदृशे मतभेदे वा प्रत्यक्षे संशयास्पदे ।
अनुमानप्रमाणेन सत्यं निर्धार्यते बुधैः ।।६७

द्रष्ट्यांस दिसते काही दूरचे भव्य-दिव्यसे
सामान्य दृष्टिच्या लोकां तसे ते न दिसे परी ।।६२

‘का ज्ञान द्रष्ट्या लोकांचे मानावे अप्रमाण ते ?
पूर्वग्रह असे होती सत्यशोधास बाधक’ ।।६३

**१५) शंकेचे निरसन –**

यावरी म्हणतो आम्ही ‘पूर्वग्रह असा नसे
परि येथे तर्कमात्रे घ्यावा निर्णय, हे बरे’ ।।६४

देखिले जे जसे ज्याने भव्य-दिव्य असो नसो
त्याच्यासाठी तेच सत्य, यात शंका मुळी नसे ।।६५

न पाहताच परि ते सत्य व्हावे परां कसे ?
‘अदर्शनामुळे सत्य’, असे कोण म्हणू शके ?६६

विवाद्य होता प्रत्यक्ष, मतभेदांत गुंतता,
अनुमानप्रमाणाने सत्यनिर्णय होतसे ।।६७

62) For, ordinary people are not able to witness some sublime thing in the same way as it is viewed by some visionaries.

63) How is not this sublime view accepted as perception ? Are not prejudices like this harmful to the search of the truth ?

**15) <u>Clarification of the doubt</u> -**

64) To this we say, “No, there is no prejudice whatsoever. But decision in this matter must be made by rational reasoning.”

65) Whatever one has viewed, whether sublime or not, is undoubtedly ‘the truth’ for him.

66) But how should others accept it as a truth without seeing it ? It cannot be argued that it must be the truth because it is not seen !

67) In such a difference of opinion, or when the perception is a bone of contents, the truth is determined by means of inference, by the wise.

अधिष्ठाय धरामेव तद्-गोलाकारदर्शनम् ।
विधातुं चर्मचक्षुर्भ्यां शक्नुवन्ति न मानवाः ।।६८

अतः खगोलशास्त्रज्ञैर्गोलाकारो भुवस्तदा ।
प्रयोगैश्चक्षुषा दृश्यैः सत्यत्वेन समर्थितः ।।६९

प्रयोगैरनुमानैश्च भवेद्यदि समर्थितम् ।
परं यत् द्रष्टृभिर्दृष्टं शास्त्रमान्यं भविष्यति ।।७०

समर्थितं न तर्केण प्रत्यक्षेणाथ वा पुनः ।
किञ्चिद्विधानं कस्यापि न ग्राह्यं सत्यमार्गणे ।।७१

**१६) प्रत्यक्षानुमानप्रमाणाभ्याम् ईश्वरादिकल्पनानां परीक्षणम् -**

अथानुमानप्रत्यक्षप्रमाणाभ्यां परीक्ष्यते ।
अस्तित्वमीश्वरादीनां सिध्यते किं कथञ्चन ?७२

गोलाकार धरित्रीचा तिच्यावरच राहुनी
पाहणे चर्मचक्षूंनी शक्य कोणासही नसे ।।६८

खगोलशास्त्रवेत्त्यांनी पृथ्वीची गोल आकृती
प्रयोगें इंद्रियां गम्य सिद्ध केली म्हणोनिया ।।६९

प्रयोगें, अनुमानांनी होतसे जर सिद्ध ते
शास्त्रास मान्य होईल, द्रष्ट्यांनी जे विलोकिले ।।७०

प्रत्यक्षे. अनुमाने वा, सिद्ध नाही विधान जे
कोणतेही, कुणाचेही ग्राह्य ना सत्यशोधनी ।।७१

**१६) प्रत्यक्ष व अनुमान यां प्रमाणांनी ईश्वरादि कल्पनांचे परीक्षण –**

प्रत्यक्ष-अनुमानांनी पाहूया पारखूनिया
सिद्ध होतात का देव, आत्मा, ब्रह्मादि कल्पना ।।७२

68) With their naked eyes, human beings cannot view the round shape of the earth, while resting on the earth itself.

69) That is why scientists in astronomy proved the round shape of the earth, as a matter of fact, by experiments, visible to the eyes.

70) Now,'the sublime' viewed by the visionaries shall be accepted as a 'truth' by the science,provided it is supported by experiments and inference.

71) But any statement of any authority, not supported by perception or inference, cannot be accepted as a fact in the search of truth.

**16) Testing the ideas like god etc. by Perception and Inference –**

72) Now let us proceed to verify whether the existence of god etc. can be proved by perception or Inference.

यथा न दृश्यते देवस्तथा न श्रूयतेऽपि सः ।
घ्रायते स्पृश्यते नासौ तथा नास्वाद्यते ऽपि सः ।।७३

यतो ज्ञानेन्द्रियैर्देवो ज्ञायते न कथञ्चन ।
प्रत्यक्षेण प्रमाणेन देवास्तित्वं न सिध्यति ।।७४

प्रत्यक्षाधारहीनं चेदनुमानं न तिष्ठति ।
नानुमानेनापि तस्मात् सिध्यते देवकल्पना ।।७५

अतो देवो देवलीलाः कृपा कोपोऽपि तस्य वा ।
जीवात्मा परमात्मा वा स्वर्लोको नरकस्तथा ।।७६

पूर्वजन्म पुनर्जन्म पूर्वकर्मफलं तथा ।
जन्ममृत्युयुतं चक्रं तस्मान्मोक्षस्तथैव च ।।७७

मनसा चिन्तिताः सर्वा रम्या एतास्तु कल्पनाः ।
असत्याश्च निराधाराः सत्यमेतत्तु गोप्यते ।।७८

चतुरा बुद्धिमन्तस्ते यैस्ततं जालमीदृशम् ।
यदभूच्छठहस्ते तु जनशोषणसाधनम् ।।७९

न दिसे, ऐकता ना ये, देव तो स्पर्शिता न ये
चव ना गंध ना त्याला, इंद्रियां देव नाकळे ।।७३

ज्ञानेंद्रियांनी देवाचे अस्तित्वच न जाणवे
न प्रत्यक्ष प्रमाणाने सिद्ध ईश्वर होतसे ।।७४

प्रत्यक्षाधार नसता टिकते अनुमान ना
म्हणून अनुमानेही देव सिद्ध न होतसे ।।७५

म्हणून देव, देवाचे लीला, कोप, अनुग्रह
जीवात्मा, परमात्मा वा नरक-स्वर्गवास-ही ।।७६

पूर्वजन्म, पुनर्जन्म, फल वा पूर्वकर्मज
चक्र वा जन्ममृत्यूचे मुक्ती जीवास त्यातुन ।।७७

तथापि सर्व या भव्य,रम्य, केवळ कल्पना
सत्य हे गोपिले मात्र लोकांपासून सर्वथा ।।७८

चाणाक्ष धूर्त लोकांनी जाळे हे विणले असे
शठाहाती तेचि होई जनशोषणसाधन ।।७९

73) God cannot be seen or heard; nor be smelt, touched or tasted.

74) As god cannot be known in any way by the sense-organs, the existence of god is not proved by the evidence of Perception.

75) No inference can stand if it is not based on perception. Hence the concept of god is not proved by the evidence of Inference either.

76–78) Hence god, his feats, favour, disfavour, soul, Highest self, heaven, hell, previous birth, rebirth, fruit of previous birth, the cycle of birth and death, liberation from this cycle –all these are, though enchanting , just fantastic imaginative ideas, which are utterly false and baseless.

79) Those who spread this net were indeed clever and intelligent. But this very net provides a dreadful device of exploitation of gullible people, in the hands of the crooks.

## १७) अथ शब्दप्रमाणम् –

परीक्षितव्यमधुना प्रमाणं शब्दनामकम् ।
येन सत्यमसत्येनावृतं भवति नैकदा ।।८०

विधानं किञ्चिदुक्तं वा लिखितं पठितं श्रुतम् ।
सत्यासत्यत्वमेतस्य स्वतःसिद्धं न चान्यथा ।।८१

केनोक्तं लिखितं वा तत्कुत्र वा ऽऽसादितं कदा ।
एतज्ज्ञानं न सम्बद्धं तस्य सत्यत्वनिर्णये ।।८२

‘अस्ति पृथ्वी सपाटे’ति विधानं बाय्बले कृतम् ।
मन्यन्ते स्म च तत् सत्यं बाय्बलोपासकाः पुरा ।।८३

ब्रूनो, गॅलिलिओ, तद्वत् कोपर्निकस आदिभिः ।
प्रयोगैरनुमानैर्भूर्गोलाकारेति दर्शिता ।।८४

## १७) शब्दप्रमाणपरीक्षा –

तपासून आता पाहू प्रमाणा शब्दनामका
ज्यामुळे झाकले जाते असत्ये सत्य कैकदा ।।८०

लिखितोक्त विधानाचे, अथवा पठित, श्रुत
सत्यासत्यत्व असते स्वयंसिद्ध असंशय ।।८१

कशासाठी, कुणी केले, ते विधान कुठे, कधी
सत्यासत्यत्व त्याचे ना ठरे या माहितीवरी ।।८२

‘सपाट आहे धरणी’, बाय्बलस्थ विधान हे
सत्य मानत होते जे बाय्वलाचे उपासक ।।८३

पृथ्वीचा गोल तज्ज्ञांनी ब्रूनो-गॅलिलिओसम
अनुमाने, प्रयोगांनी सिद्ध केला निखालस ।।८४

## 17) The evidence known as ‘Statement’ (Authority) –

80) Now let us examine the evidence named ‘Statement’, with which truth is regularly covered by untruth.

81) Any statement uttered, written, read or heard, is true or untrue ‘by itself’ and not by any other appendages.

82) The information like who made the statement, where, when or where it was discovered, etc. is not in any way related to its being true or false.

83) A statement in bible to the effect that the earth is flat was believed as true by the followers of bible, in olden times.

84) But scientists like Bruno, Copernicus and Galileo etc. showed by experiments and inference that earth is round.

अन्वेषणं तथाप्येद् बाय्बलेन विसङ्गतम् ।
अतस्ते धर्ममार्तण्डैः प्राणदण्डेन दण्डिताः ।।८५

‘ वेदा अपौरुषेयाश्च’ ‘न स्त्री स्वातन्त्र्यमर्हति’ ।
‘शूद्रो वेदे नाधिकारी’ ‘जातिर्जन्मन्यधिष्ठिता’ ८६

‘देहो मृत्युवशो नात्मा सोऽजोऽनन्तश्च शाश्वतः ।
जीर्णं शरीरं सन्त्यज्य देही संयाति नूतनम् ’ ।।८७

‘ब्रह्म सत्यं जगन्मिथ्या’ ‘जीवो ब्रह्मैव नापरः’ ।
‘ध्रुवं जन्म मृतस्या’दिघोषास्तस्मान्निरर्थकाः ।।८८

श्रुतिस्मृतिपुराणेषु विधानानीदृशानि वै ।
आद्यर्षिभिः कृतानि स्युस्तथोक्तेनेश्वरेण वा ।।८९

तेनैव तानि सत्यानि, सिद्धान्यपि भवन्ति न ।
यतः प्रत्यक्षतर्काभ्यां समर्थ्यन्ते न तानि वै ।।९०

तथापि संशोधन हे, बाय्बलाशी विसंगत
म्हणून धर्माचार्यें त्या दिले देहान्तशासन ।।८५

‘नरे ना निर्मिले वेदां’, ‘स्वातंत्र्या पात्र ना स्त्रिया’
‘वेदाधिकार ना शूद्रां’, ‘जन्माने जात ती ठरे’ ।।८६

‘मरतो देह ना आत्मा’, ‘नित्य आद्यन्तमुक्त तो’
‘शरीर त्यजुनी जीर्ण, शिरे देही नवीन तो’ ।।८७

‘ब्रह्म सत्य जगत् मिथ्या’, ‘जीव ब्रह्मच ना दुजा’
‘मृताला जन्म ठरलेला’, घोषणा या निरर्थक ।।८८

श्रुति-स्मृति-पुराणांत विधाने ही अशी जरी
केली मुनींनी अथवा ईश्वराने तथोक्त त्या ।।८९

तेवढ्यानेच ती सिद्ध , सत्य ना ठरती मुळी
न प्रत्यक्ष न वा तर्क प्रमाणे सिद्ध होत ती ।।९०

85) However as this finding of theirs was contrary to the contents of bible. Hence they were physically tortured by the religious authorities.

86-88) Hence the statements like ‘The Vedas are superhuman creations’, ’Women do not deserve freedom’, ’Shudras have no right to study Vedas’, ‘Caste is determined by the birth’, ’Body is motal, not the soul; it is without a beginning or end; it is eternal; it discards the worn out body and enters into a new one’, ’Brahman is the only truth, this world is false’, ’A living being is Brahman itself and not different from it’, ’A new birth is destined for the dead’, etc. - are all nonsensical proclamations.

89,90) These and such other statements found in Vedic or Scriptural literature, do not become true, only because they are made by ancient sages or the socalled god, insmuch as they are not vouched by Perception or Inference.

सत्यनिर्णयप्रत्यूहं प्रमाणं शब्दनामकं ।
अन्धश्रद्धोपकारित्वादतस्त्यज्येत सर्वथा ।।९१

शब्दप्रमाण ही बाधा सत्यनिर्णय साधता
अंधश्रद्धाच ते पोशी म्हणोनी त्याज्य सर्वथा ।।९१

91) That is why the evidence called ‘Statement’, is a great hurdle in the search of truth, and must be discarded outright, as it sponsors superstition.

## १८) श्रद्धा, अन्धश्रद्धा, पश्यतः श्रद्धा च -

## १८) श्रद्धा, अंधश्रद्धा व डोळस श्रद्धा

## 18) <u>Faith, conscious faith and blind faith</u> –

अन्धश्रद्धा च श्रद्धा च तथा श्रद्धा च पश्यतः ।
समानार्था मताः किन्तु भिन्नाः सङ्कल्पना इमाः ।।९२

अंधश्रद्धा आणि श्रद्धा, श्रद्धा डोळस या अशा
संकल्पना भिन्न भिन्न, नोंद ही घ्यायला हवी. ।।९२

92) Faith, conscious faith and blind faith are mistaken to be synonymous terms but they are different concepts.

विश्वासो वस्तुनि श्रद्धा यदद्यापि न गोचरम् ।
तस्मिन् साध्येऽनुमानेन सा श्रद्धा पश्यतो भवेत् ।।९३

श्रद्धा विश्वास वस्तूत, इंद्रियें नानुभूत जी
अनुमाने ज्ञात होता श्रद्धा तीवर डोळस ।।९३

93) ‘Faith’ is the belief in a thing which is not perceived by sense-organs. If that thing isprovable by inference, the belief in it is ‘conscious faith’.

प्रत्यक्षं यस्य न ज्ञानं यद् वा नैवानुमन्यते ।
तस्मिन् वस्तुनि विश्वासः साऽन्धश्रद्धा मता मया ।।९४

जी प्रत्यक्ष प्रमाणे वा अनुमानेहि ना कळे
अशा वस्तूत विश्वास, अंधश्रद्धा मला गमे ।।९४

94) Belief in a thing not accecible to Perception or Inference is ‘Blind faith’ or superstition in my opinion.

व्यवहारो मनुष्याणां प्रायशो जायते यया ।
सा श्रद्धा पश्यतः श्रद्धा यतः सा तर्कसंश्रिता ।।९५

व्यवहारास नित्याच्या श्रद्धा जी लागते सदा
तर्काधिष्ठित असल्याने तियेला नाव डोळस ।।९५

95) The faith by which the usual dealings of people are carried on, is conscious faith, since it is based on inference.

## १९) काश्चन अन्धश्रद्धाः -

'जीवात्मा परमात्मा च सृष्टिकर्ता तथेश्वरः ।
जन्ममृत्युमयं चक्रं, दैवं, मुक्तिश्चमत्कृतिः' ।।९६

'प्राणिनो गुणरूपे च स्वभावो जीवनक्रमः ।
सर्वं तत् ग्रहनक्षत्रस्थितिमेवावलम्बते' ।।९७

'जपयज्ञस्तोत्रपाठैर्ग्रहपीडानिवारणम्' ।
'यशःपुत्रधनप्राप्तिः कृपया विद्यते गुरोः' ।९८

कल्पना ईदृशा मिथ्याः प्रत्यक्षेणानुमानतः ।
अतस्तेषु सुविश्वासोऽन्धश्रद्धेति परिस्फुटम् ।।९९

## २०) ज्योतिषशास्त्रस्याधारेण जनानां वञ्चना 

फलज्योतिषशास्त्रे यो विश्वासो दृश्यते जने ।
सोऽन्धश्रद्धा विशेषेण परिणामोऽस्य ज्ञायताम् ।।१००

## १९) काही अंधश्रद्धा –

'जीवात्मा परमात्मा वा सृष्टिकारक ईश्वर
चक्र, जन्म नि मृत्यूचे, दैव, मुक्ती चमत्कृती' ।।९६

'गुणरूपस्वभावादि प्राण्यांचे जीवनक्रम
या गोष्टी ग्रहनक्षत्रस्थितीनेच नियंत्रित' ।।९७

'जपयज्ञस्तोत्रपाठे ग्रहपीडानिवारण
गुरुकृपे लाभतात यश,पुत्र,तसे धन' ।।९८

प्रत्यक्षे अनुमाने वा या साऱ्या फोल कल्पना
विश्वास त्यांवरी अंधश्रद्धा हे स्पष्ट होतसे ।।९९

## २०) ज्योतिषशास्त्राच्या आधाराने लोकांची फसवणूक

फलज्योतिषशास्त्री जो जनविश्वास सर्वथा
अंधश्रद्धा तीहि घोर तिचे कावेहि पाहुया ।।१००

## 19) **Some superstitions** -

96 – 99) Ideas like 'Soul','Highest self','God- the creator of the world', 'Cycle of birth and death', 'Fate','Salvation','Miracle','The position of planets and constellations- as the determinants of the form, quality, character and the course of life of the beings', 'Reiteration of god's name, sacrifice, recitation of hymns- as the antidotes for the sufferings due to adverse planets' - and so on, are all false by the tests of Perception and Inference. Hence belief in them is clearly blind faith.

## 20) **Deceit of people by means of astrology –**

100) The belief of people in astrology is altso a severe superstition. Its consequences are worth noting.

जीवनं सर्वजीवानां नवग्रहनियन्त्रितम् ।
भूतं च वर्तमानं च भविष्यं च तदाश्रितम् ।।१०१

नवग्रहाधीन साऱ्या जीवांचे पूर्ण जीवन
भूतासवे वर्तमान तदाधीन भविष्यही ।।१०१

101) The life of all beings is controlled by the nine planets. The past, present and the future of the beings is determined by them only.

तथा क्रूरग्रहाणां च शान्तिश्चापि सुकल्पिता ।
मन्त्रतन्त्रबलिस्तोत्रैः फलज्योतिषपद्धतौ ।।१०२

ग्रहांच्या दुष्ट व क्रूर, शांतीची तरतूदही
मंत्रतंत्रबलिस्तोत्रे सिद्धांती कल्पिली असे ।।१०२

102) The remedy against the adverse planets by way of incantations, mystical techniques, offering victims and chanting of hymns is also provided in this cult of astrology.

ग्रहशान्तिनिमित्तेन साधनस्यास्य विक्रयः ।
लाभदो व्यवसायोऽयं साम्प्रतं वृद्धिमागतः ।।१०३

ग्रहशांतिनिमित्ताने जनां अज्ञां लुबाडणे
व्यवसाय असा सध्या भरभराटीस येतसे ।।१०३

103) Selling these devices in the name of passifying the adverse planets, has become a thriving business these days.

अपङ्गा निर्धना अज्ञा आपद्ग्रस्तास्तथाऽऽतुराः ।
भाविकाः षड्रिपुग्रस्ता निराधाराश्च दुर्बलाः ।।१०४

गरजू ,दुबळे, भोळे, दरिद्री, त्रस्त संकटे
अनाथ षड्रिपुग्रस्त, रोगी आणिक भाविक ।।१०४

एवंविधा जना लोके स्वस्वदुःखेन पीडिताः ।
निवारणस्य दुःखस्य नोपायं तु विजानते ।।१०५

असे नाना व्यथांनी हे पीडिले जन या जगी
उपाय दुःखमुक्तीचा मात्र कोणी न जाणती ।।१०५

104,105) Many people are handicapped, poor, ignorant, tormented with calamities, suffering from diseases or the six enemies, supportless, feeble, etc. They are crushed by their own problems but do not know how to overcome their worries.

'ग्रहप्रभावाद्दैवाच्च स्वदुःखमुपजायते' ।
इति प्रचारे विश्वस्य ज्योतिषज्ञं प्रयान्ति ते ।।१०६

'ग्रहप्रभावे दुर्दैवे दुःखे उपजती जगी'
भुलोनी या प्रचाराला धावती ज्योतिषांकडे ।।१०६

106) They trust in the propaganda that our grieves arise due to the influence of the planets and fate and run to the astrologers.

विवाहगृहसन्तानधनारोग्ययशःसुखान् ।
काङ्क्षन्तो बहवोऽन्येऽपि ज्योतिषज्ञवशंगमाः ।।१०७

सत्ता, आरोग्य, संपत्ती, विवाह, गृह, संतती
यांचे इच्छुक, ते होती, ज्योतिषांचे जणू बळी ।।१०७

107) Many others who desire marriage, house, children, good health, success and other pleasures, also enter into the fold of astrologers.

दैवज्ञा गुरवो देव्यो मान्त्रिकाश्च पुरोधसः ।
ज्योतिषज्ञब्रुवा एते सर्वे परमदाम्भिकाः ।।१०८

बाबा, बुबा, गुरू, देवी, योगी, दैवज्ञ, मांत्रिक
तथाकथित ज्ञानी हे बहुधा धूर्त दांभिक ।।१०८

108) The ‘Daivajnas’, ‘Guravas’, priests, and saints claiming the knowledge of astrology are all conjuring crooks.

शठानां वणिजामेषामन्धश्रद्धापरा जनाः ।
भवन्ति ग्राहकाः सर्वे स्वेच्छापूर्तिचिकीर्षवः ।।१०९

कामपूर्ती इच्छिणारे अंधश्रद्ध व भाविक
लबाड बनियांचे या, ठरती खास ग्राहक ।।१०९

109) All these people craving to satisfy their desires become easy customers of these cunning businessmen.

ग्रहशान्तिनिमित्तेन ग्राहकाणां हि सर्वथा ।
शोषणे भीषणे लग्ना एते स्वार्थपरायणाः ।।११०

ग्रहशांतिनिमित्ताने नाना ढोंगे करून हे
करिती ग्राहकांचे त्या पुरे शोषण भीषण ।।११०

110) These selfish crooks are bent upon exploiting these customers in the name of passifying the adverse planets.

## २१) नास्तिकानां शङ्का चिन्ता च –

## २१) नास्तिकांच्या शंका व चिंता -

## 21) <u>The doubts and concern of the atheists</u> –

बन्धनेषु स्वयं बद्धा ग्रहा जीवस्य जीवनं
भविष्यमथ वा तस्य निर्णेतुं शक्नुयुः कथम् ?१११

कसे जीवन जीवांचे वर्तमान भविष्य वा
बंधनी जे स्वतः बद्ध, घडवू शकती ग्रह ?१११

111) How are the planets, which are themselves captives of strict restricted routine, able to control the present or future life of the beings ?

जन्मकालग्रहावस्था निर्धारयति पत्रिकाम् ।
जन्मकालः स्वयं किन्तु निश्चितो नैव विद्यते ।।११२

ग्रहस्थिती जन्मकाळी ठरवे जन्मपत्रिका
व्याख्याच जन्मकाळाची परि नाही सुनिश्चित।।११२

112) The horoscope of a child is determined by the position of the planets at the time of its birth. But the time of birth is itself a bone of contents.

केऽप्यर्भकशिरोदर्शमशेषस्य तनोः परे ।
गर्भाधानक्षणं चान्ये कालं गृह्णन्ति जन्मनः ।।११३

मस्तकाच्या बालकाच्या, देहाच्या पूर्ण दर्शना
गर्भाधानक्षणा किंवा जन्माचा काळ मानिती ।।११३

113) Some consider the appearance of its head; some others the full view of its whole body and still others consider the moment of its conception as the time of its birth

जन्मकालः स्वयं यत्र विवादविषयश्चिरम् ।
कथं कस्य भविष्यं वा निर्णयेज्जन्मपत्रिका ?११४

जन्मकाळच हा जेथे वादास्पद चिरंतन
जीवनक्रम जीवाचा कसा सांगेल पत्रिका ?११४

114) When the time of birth itself is a perpetually datable topic, how can the horoscope determine the future of anybody ?

सिझेरिनिति तन्त्रेणाऽपत्यजन्मोऽपि कार्यते ।
इष्टे देशेऽथ वा काले वाऽनुकूलग्रहस्थितौ ।।११५

सिझेरिन्च्या प्रयोगाने बाळाचा जन्म आपण
इष्टदेशी इष्टकाळी घडवू शकतो आता ।।११५

115) Recently with the ‘Caesarean technique’ the birth of a child can be arranged at a favourite time or place or at a favorable position of planets.

अभविष्यत् ग्रहाधीनं यदि भाग्यं तु प्राणिनाम् ।
अकारयिष्यत् पुत्रस्य जन्मेष्टे समये पिता ।।११६

असते जर प्राण्यांचे ग्रहाधीनच जीवन
असते घातले जन्मा बाळाला इष्ट तेधवा ।।११६

116) Had the fortune of the beings dependent on the planets, a father would have arranged the birth of his son at the most desirable juncture.

राहुकेतू न विद्येते , ग्रहौ न शशिभास्करौ ।
अन्विष्यन्ते च कालौघे ग्रहगोला नवा नवाः ।।११७

ना चंद्र ग्रह ना सूर्य, राहू-केतू न वास्तव,
कालांतरे ज्ञात होती, ग्रहगोल नवे नवे ।।११७

117) Out of the nine planets, Rahu and Ketu do not exist at all. The sun and the moon are not planets; and new planatory bodies, not known hitherto, are discovered in the course of time.

एवं स्थिते कथं ज्योतिःशास्त्रं विश्वासमर्हति ?
अज्ञास्तथापि वञ्च्यन्ते ज्योतिषज्ञब्रुवैः शठैः ।।११८

अशा स्थितीत स्वीकार्य फलज्योतिष कसे ठरे ?
परी त्याच्याच आधारे जनां ठकविती शठ ।।११८

118) Under these circumstances, how can astrology claim any trustworthiness? Yet the gullible people are cheated by the crooks calling themselves astrologers.

भारतेषु विवाहस्य प्रत्यूहो मङ्गलग्रहः ।
विदेशेषु कथं वाऽसौ विवाहघ्नो न जायते ?११९

भारतात विवाहास येई मंगळ आडवा
विदेशात परी त्याचा नसे कैसा उपद्रव ? ११९

119) The Mars is believed in India to be a hurdle in a wedding. How does it not spoil weddings in other countries ?

शास्त्रेऽस्मिन्नुच्यते 'दुष्टो मङ्गलो' 'ऽमङ्गलः शनिः'
ननु मन्ये ग्रहावेतावस्थाने निन्दितौ खलैः ।।१२०

या शास्त्री 'मंगळा दुष्ट', 'शनीला क्रूर' मानिती
बदनाम उगा होती ग्रह हे निरुपद्रवी ।१२०

120) The Mars is called wicked and the Saturn the devil in this cult. I feel that these planets are censured for no reason whatsoever, by the rogues

असमीक्ष्य मुहूर्तं वा पत्रिकां वा कृताश्च ये ।
विवाहाः सफलास्तेऽपि दृश्यन्ते बहुशो जने ।।१२१

पाहता न मुहूर्ता वा पत्रिका, घडतात जे
विवाह न यशस्वी ते सारे, होतात का जगी ? ।।१२१

121) A number of marriages, which arranged without consulting horoscopes or 'Muhurta' appear to be successful in the society..

विवाहा येऽपि संपन्नाः परीक्ष्य जन्मपत्रिकाम् ।
सर्वेऽपि ते फलद्रूपा निर्विघ्ना वा भवन्ति किम् ?१२२

इति शङ्का न मनसि विदुषां जायते कथम् ?
कथं तैर्बुद्धिसामर्थ्यमात्मनो न प्रयुज्यते ?१२३

पत्रिकासमतोलस्य वैवाहिकसुखस्य च ।
अतोऽन्योऽन्यो न संबन्धो दृश्यते कोऽपि जीवने ।१२४

## २२) अन्धश्रद्धान्तराणि -

सार्धं ज्योतिषशास्त्रेण रूढा अन्याश्च कल्पनाः ।
अन्धश्रद्धाश्रिताः सर्वास्तर्केण तु विसङ्गताः ।।१२५

'ग्रहस्थानानुरूपा स्यात् वास्तुनो रचना सदा' ।
इति तत्त्वं पुरस्कृत्य वास्तुशास्त्रं प्रतिष्ठितम्।।१२६

विवाह जेवढे होती पाहूनी जन्मपत्रिका
होतात काय ते सारे यशस्वी जीवनात या ?१२२

अशी शंकाहि ज्ञात्यांच्या चित्ती कैशी न येतसे ?
जाणते करिती कैसे बुद्धीचाहि न वापर ?।।१२३

पत्रिकाजुळणी आणि विवाहाची यशस्विता
यांचा अन्योन्यसंबंध मुळीच म्हणुनी नसे ।।१२४

## २२) इतर काही अंधश्रद्धा –

अशाच आणखी काही कल्पना रूढ जाहल्या
अंधश्रद्धाश्रिता साऱ्या तर्काशी न सुसंगत ।।१२५

'अनुरूप ग्रह-स्थानां वास्तूची रचना हवी '
असा दावा मांडतात वास्तुशास्त्रविशारद ।।१२६

122) On the other hand, are all weddings arranged by consulting horoscopes, successful and free from hurdles altogether ?

123) How does not such a doubt arise in the minds of the wise people also? How don't they use the power of reasoning?

124) Thus, agreement of horoscopes and happy married life do not appear to have any mutual correlation or correspondence whatsoever in life.

## 22) <u>Some other superstitions</u> –

125) Along with Astrology, many other myths are practised in the society, which are based on blind faith and averse to Inference.

126) An ancient concept of architecture is gaining popularity in recent times, which insists that the design of a structure must be in accordance with the position of planets.

अज्ञात्वोपेक्ष्य वा तत्त्वमिदं रचितवास्तुषु ।
सर्वत्र जीवनं दुःखमिति नैवानुभूयते ।।१२७

इदं शास्त्रमनुसृत्य वास्तूनि रचितानि यैः ।
अपि तेषां नु सर्वेषां जीवनं दुःखवर्जितम् ?१२८

अन्तर्ज्ञानं चमत्कारो मृतस्योज्जीवनं पुनः ।
वरः शापश्च दृष्टान्तो जारणं मारणं तथा ।।१२९

पिशाचडाकिनीभूतादिविलक्षणयोनयः ।
प्रसन्नाश्चाप्रसन्नाश्च प्राणिभ्यो सुखदुःखदाः ।।१३०

अणिमालघिमाप्राप्तिवशित्वाद्याश्च सिद्धयः ।
इत्यादिकल्पनाश्चित्ते जनानां सुप्रतिष्ठिताः ।।१३१

'श्रीशमूर्त्या पयः पीतं' 'हस्तादुत्पादितं फलं' ।
'स्पर्शेण नाशिता व्याधिः' 'जलं तैले विवर्तितम्' १३२

एतादृशाश्चमत्काराः श्रूयन्त इह सन्ततम् ।
सत्यत्वेन स्वीक्रियन्ते जनैरज्ञैः पुनश्च ते ।।१३३

दाव्यास या उपेक्षून घरे जी जी उभारली
तेथे सर्वत्र लोकांचे दुःखी कष्टी जिणे नसे ।।१२७

शास्त्रानुसार या, ज्यांनी घरे, वास्तू उभारल्या
त्या सर्वांचे कुठे आहे दुःखवर्जित जीवन ? १२८

अंतर्ज्ञान, चमत्कार, मृता संजीवनी पुन्हा
वरशापादि, दृष्टांत, तसे जारण मारण ।।१२९

पिशाच, डाकिनी, भूत आदि योनी विलक्षण
देती प्राण्यां सुखे दुःखे तुष्ट वा रुष्ट जेधवा ।।१३०

अणिमा, लघिमा, प्राप्ती, ऐशा सिद्धीहि या जगी
खऱ्याच असती ऐसा जनां विश्वास वाटतो ।।१३१

'गणराया दूध प्याला' , 'फळ हातून जन्मले',
'पळाले रोग स्पर्शाने', 'पाण्याचे तेल जाहले ' ।।१३२

नित्य ऐसे चमत्कार, येती कानी नि वाचनी
अजाण भोळे जनही तयांना सत्य मानिती ।।१३३

127) But life is not found to be miserable, in structures constructed in ignorance of this dictum or in violation thereof.

128) Moreover is the life of all of those who followed this principle, totally free from worries?

129-131)
Clairvoyance,miracles,resurrection,boons and curses, divine experience, causing oldage or death in absentia, spirits and goblins in various forms, which when pleased or displeased would make man happy or sorry, numerous miraculous powers are such other ideas which have taken hold of people's mind.

132,133)
Miracles like 'The idol of Ganesh drank milk', 'A fruit was produced from hand',' Diseases were cured just by touch', 'Water was converted into oil', etc. are constantly heard here; and they are accepted by ignorant people as true.

कल्पना ईदृशा मिथ्या प्रत्यक्षेणानुमानतः ।
विश्वासस्तेषु जानीयादन्धश्रद्धेति बुद्धिमान् ।।१३४

प्रत्यक्षे, अनुमाने वा या साऱ्या झूठ कल्पना
विश्वासा त्यांवरी सुज्ञ अंधश्रद्धाच मानती ।।१३४

134) Such myths are false by the evidence of Perception or Inference. A rational person deser- ves to know that belief in them is a 'blind faith'.

## २३) आस्तिकानां तर्कविसङ्गताः विचारव्यवहाराः -

## २३) आस्तिकांचे तर्कहीन विचार व आचार –

## 23) <u>Irrational thinking and behaviour of the theists –</u>

प्रकृतेर्नियमैः सृष्टेर्व्यवहाराः सुनिश्चिताः ।
अपवादः क्वचित्तत्र तस्यापि नियमो ध्रुवः ।।१३५

निसर्गनियमे सृष्टिव्यवहार सुनिश्चित
अपवाद क्वचित् तेथे नियमे तोहि निश्चित ।। १३५

135) The entire events in the world are well regulated by laws of Nature. Hardly there is an exception, which also follows a particular law.

शीतोष्णेन पदार्थानां सङ्कोचो विस्तरस्तथा ।
नियमस्यास्यापवादो जलप्रसरणं यथा ।।१३६

वस्तु-संकोच-विस्तार थंडी नि गरमीमुळे
जलप्रसारण जसा नियमा अपवाद या ।।१३६

136) The anomalous expansion of water is also a law, which is a regular execption to the general law that 'heat expands and cold contracts'.

एवं स्थिते चमत्काराः सम्भवन्ति कुतः कथम् ?
इति शङ्काऽपि लोकानां कथं जातु न जायते ?१३७

वस्तुस्थितीत या ऐशा, चमत्कार कसा घडे ?
असा विचार सुज्ञांच्या मनी कैसा न येतसे ? १३७

137) Such being the case, where is the scope for a miracle? But even a doubt like this does not trouble the people !

बुद्धिरप्रतिमा प्राप्ता मानवेन निसर्गतः ।
सारासारविचारोऽपि तेन किं न विधीयते ?१३८

निसर्गाने मानवाला दिली बुद्धी विलक्षण
सारासारविचाराही तो होतो पारखा कसा ?१३८

138) Man is naturally endowed with excellent talent; why then do men refuse to think over what is possible and what is impossible?

स्तुत्वा स्तोत्रादिभिर्देवो याच्यते कामना जनैः ।
उत्कोचेन वशीकृत्य यथा लोकेऽधिकारिणः ।।१३९

स्तुती करून देवाची मागणे मागती जन
करून वश लाचेने अधिकाऱ्या जसे जगी।।१३९

139) People propitiate god by means of hymns etc. and then beg of him fulfilment of their desires, just as officers are bribed in the world.

एवं देवो यदि क्रेयो लोभाविष्टो यथा नरः ।
विशेषः कस्तु देवस्य कुतोऽसौ पूज्यतां नरैः ?१४०

विकाऊ, लाचखाऊ हा असेल जर ईश्वर
अलौकिकत्व त्याचे ते सांगा कोठे कसे उरे ? १४०

140) If then god is greedy and can be bought for a price, what is the 'Greatness' of god and why should he be worshipped?

विहाय बुद्धिसामर्थ्यं श्रद्धामाश्रित्य निर्णयं ।
पण्डिता अपि कुर्वन्ति चित्रं स्यात् किमतः परम् ।।१४१

श्रद्धेवर विसंबून, बुद्धिसामर्थ्य सोडुन
शहाणे निर्णया घेती याहुनी दुःख कोणते ?१४१

141) But even the scholars throw away reasoning power and take the decisions by resorting to faith. What can be more stunning than this?

अन्धश्रद्धागता दोषा अथ ज्ञेयाः सविस्तरम् ।
श्रेयस्त्वमश्रेयस्त्वं वा ततस्तस्याः सुनिर्णयेत् ।।१४२

अंधश्रद्धेतले दोष, धोके जाणून घेउया
स्वीकार वा अस्वीकार, तिचा त्यावरती ठरे ।।१४२

142) Let us now try to understand the dangers involved in blind faith. Then one should decide the advisability or otherwise of following it.

## २४) अन्धश्रद्धा कुतो नाश्रेया –

## २४) अंधश्रद्धा का बाळगू नये ? –

## 24) <u>Why should not superstitions be resorted to ? –</u>

अन्धश्रद्धा कुतो हेया ? इति प्रश्न उपस्थिते ।
तत्समाधानमधुना क्रियतेऽथ सविस्तरम् ।।१४३

अंधश्रद्धा त्याज्य कैशी ? सवाल पडता असा
त्याचे उत्तर जाणूया आता विस्तारपूर्वक ।।१४३

143) Let us try now to understand in details, why superstitions should not be resorted to.

अहार्या जीवने श्रद्धा, किन्तु सा पश्यतो भवेत् ।
अन्धश्रद्धा तु लोकानां विनाशायैव कल्पते ।।१४४

जीवनी अटळ श्रद्धा, परी डोळस ती हवी
अंधश्रद्धा समाजाच्या सर्वनाशास कारण ।।१४४

144) Faith is inevitable in life; but it should be conscious faith. The blind faith brings about total destruction of people.

सत्यान्वेषणमित्येव सर्वशास्त्रप्रयोजनम् ।
अन्धश्रद्धा तत्र बाधा महती सा भयावहा ।।१४५

असावे सर्व शास्त्रांचे ध्येय सत्यगवेषण
अंधश्रद्धा त्यात बाधा फार मोठी भयावह ।।१४५

145) Search of truth deserves to be the objective of all sciences. Blind faith is a serious impedement in that regard.

चराचरस्य विश्वस्योत्पत्तिस्थितिलयादयः।
एतेषां निश्चितं सत्यमेकं भवितुमर्हति ।।१४६

या चराचर सृष्टीच्या जन्मस्थितिलयादिचे
एकमात्र असे सत्य, यात शंका असू नये ।।१४६

146) There must be ONE and ONLY ONE certain truth behind the origin, continuance and the end etc. of this entire universe.

तदन्तरेण कालौघे तर्कास्तु विविधाः कृताः।
तत्त्वज्ञानानि धर्माश्च तेभ्यो जातास्तथाविधाः ।।१४७

त्या संबंधात कालौघी तर्क झाले बरेचसे
तशीच तत्त्वज्ञाने अन् धर्म झाले तथाविध ।।१४७

147) Various theories have been built in that regard in the course of time. These theories gave rise to many philosophies and religions.

तत्त्वज्ञानप्रणेतारो धर्मसंस्थापकाश्च ते ।
विचारवन्तः सर्वेऽपि सत्यदर्शनकांक्षिणः ।।१४८

तत्त्वज्ञानप्रणेते ते धर्मसंस्थापनाकर
विचारवंत ते सारे सत्यदर्शनइच्छुक ।। १४८

148) The founders of these philosophies and religions must have been great thinkers and seekers of trufh.

तथापि मतभिन्नत्वात् 'तेषामेको न कोऽपि वा ।
सत्यस्य वस्तुनो द्रष्टा भवेद्वा न भवेदपि' ।।१४९

मतभेदे तयांतील 'जाणता सत्य वस्तुचा
असे एकच (वा कोणी नसे)' हे स्पष्ट होतसे।।१४९

149) But the differences in their views about THIS ONE TRUTH reveal that any ONE or NONE of them may or may not have been able to realise ithat truth for sure.

‘विश्वसत्यं वयं ब्रूमः’ इति सर्वैरपीरिते ।
कस्य तत्त्वं भवेत् ग्राह्यं ‘सत्यमेतदि’ति ध्रुवम् ?१५०

‘विश्वसत्य आम्हां ठावे’ असे सारेचौ सांगता
कोणाचे तत्त्व मानावे ‘हेच सत्य’ म्हणोनिया ?१५०

150) When, therefore, all of them claim that they have realized the trurh, whose theory can be accepted as THE final truth ?

स्वधर्मान्धजनव्राताः परधर्मं द्विषन्त्यपि।
दारुणा धर्मयुद्धाश्च जायन्ते तेन भूतले ।।१५१

आततायी स्वधर्मांधां दुसरा धर्म ना सहे
त्यामुळे जगती होती धर्मयुद्धे भयानक ।।१५१

151) The fanatic advocates of one religion bitterly hate other religions and this results in fierce crusades.

यद्यस्ति परमं सत्यं सर्वधर्मैरुपागतम् ।
क्रियते नरसंहार एवं किं धर्मनामतः ?१५२

असते सर्व धर्मांना ज्ञात एकच सत्य ते
धर्मनामे नृसंहार का केला असता कुणी ?१५२

152) Had the ONLY FINAL TRUTH been realized by ALL the religions, why would have such an annihilation of human beings taken place ?

अतोऽद्यापि परं सत्यं गूढमित्येव गम्यते ।
भविष्येऽपि प्रवर्तेरन् प्रयत्नास्तद्गवेषणे ।।१५३

अद्यापि म्हणुनी वाटे गूढ ते सत्य अंतिम
तयाच्या निश्चयासाठी पुढेही यत्न होतील ।।१५३

153) Hence it appears that the REAL TRUTH is still a mystery. The attempts to discover it will continue even in future.

अतः प्रचलधर्माणामनुष्ठानं तु श्रद्धया ।
साऽन्धश्रद्धेति सुस्पष्टं भवेदिति मतिर्मम ।।१५४

श्रद्धा धर्मावरी एका कोणत्याही म्हणूनच
अंधश्रद्धाच ती ऐसे स्पष्ट माझे असे मत ।।१५४

154) Such being the state of affairs, following any one particular religion is evidently blind faith.

बुद्धिनिष्ठविचारेण व्यवहारेण तादृशा ।
मनुष्यस्य मनुष्यत्वं प्रकर्षेणोपपद्यते ।।१५५

बुद्धिनिष्ठ विचाराने आचारानेहि तत्सम
मनुष्याचे मनुष्यत्व प्रकर्षे सिद्ध होतसे ।।१५५

155) The humanity of human beings prominently lies in rational thinking and rational behaviour.

अन्धश्रद्धा विनाशाय मनुष्यत्वस्य कल्पते ।
अतः सा सर्वथा त्याज्या जनैः सुज्ञैः प्रयत्नतः ।।१५६

अंधश्रद्धा मनुष्याच्या मनुष्यत्वास घातक
म्हणून सुजनांनी ती टाळावी यत्नपूर्वक ।।१५६

156) Obviously, superstition brings about the destruction of humanity. Hence it must be scrupulously avoided by the sensible people.

विचारमूला नास्त्यैव ह्यन्धश्रद्धा स्वभावतः ।
अन्धश्रद्धाऽऽश्रयस्तस्मादविचाराय कल्पते ।।१५७

मुळात अंधश्रद्धेला विचाराचेच वावडे
जात्याच त्यामुळे तीही अविचारच पोसते ।।१५७

157) Superstition is by nature averse to thoughtfulness. Naturally it prompts irrational behaviour.

क्षुधार्तेषु सहस्त्रेषु यज्ञेष्वन्नसमर्पणम् ।
बलिर्वा मूकजीवानां केन न्यायेन युज्यते ? ।।१५८

क्षुधार्त असता लाखो, यज्ञी अन्नसमर्पण
बळी वा मूक जीवांचे ठरती न्याय्य का कधी ?१५८

158) What is the rationale in offering innocent beings as victims in the sacrifices or offering food in the fire when thousands are dying with hunger?

जीवनं सुखदुःखानां संयोगः सुमनोहरः ।
यदृच्छा चैव चरितं नराणां तत्र कारणम् ।।१५९

संयोग सुखदुःखांचा जीवनी सुमनोहर
यदृच्छा आणि जीवांचे कर्म ही त्यास कारण ।।१५९

159) The events in life is a happy blending of pleasures and pains. The behaviour of people and coincidence are the two causes thereof.

यदृच्छा या यदृच्छा सा न किञ्चित्तत्र कारणम् ।
न पापपुण्ये वा कर्म, न दैवं न ग्रहस्थितिः ।।१६०

यदृच्छा जी यदृच्छा ती, योगायोगच निव्वळ
ग्रह,कर्म, पापपुण्य, दैव ना तीस कारण ।।१६०

160) Coincidence is just coincidence. Its cause cannot be found. Merit or evil, past action, fate or position of planets do not account for it.

अतः ‘प्रभोरीश्वरस्य तोषरोषादिभिर्ध्रुवम् ।
सुखदुःखादिकप्राप्ति’रन्धश्रद्धोत्थकल्पना ।।१६१

‘ईश्वराच्या तोषरोषे सुखदुःखादि जन्मती’
कल्पना ही अशी लोकी अंधश्रद्धेमुळे रुजे ।।१६१

161) Hence ideas like ‘Pleasure and pain etc. are caused by the favour or disfavour of god etc.’ are mere products of blind faith.

अन्धश्रद्धाबाधितानां व्यवहारोऽपि दूषितः ।
बुद्धेर्द्रव्यस्य कालस्य बलस्य च स नाशकः ।१६२

अंधश्रद्ध जनांचा ह्या व्यवहारहि दूषित
बुद्धी, शक्ती, द्रव्य, काळ यांचा तो सर्वनाशक ।।१६२

162) The activities of those who are overpowered by blind faith are totally perverse. They involve wastage of talent, money, time and strength.

दैवाय दूषणं दत्वा प्रयत्नपरिवर्जनम् ।
विकला निर्णये शक्तिः परप्रत्ययनेयता ।।१६३

विसरून प्रयत्नाना, देती दैवास दूषण
निर्णयाची नसे शक्ती, परप्रत्ययनेयता ।।१६३

आत्मविश्वासलोपश्च पुरुषार्थस्य विस्मृतिः ।
तथा परेष्वधीनत्वमन्धश्रद्धाफलं खलु ।।१६४

विस्मृती पुरुषार्थाची, आत्मविश्वासलोपही
तसे परावलंबित्व, अंधश्रद्धाफळेच ही ।।१६४

163,164)
The tendency to give up all efforts and put the blame on fate, to go by the faith of others, to forget one’s own abiliity, total lack of self-confidence, inability to take a decision and dependence on others are all results of blind faith.

वञ्चयन्ति न वञ्च्यन्ते ऽन्धश्रद्धाः केऽपि सज्जनाः।
जनास्त्वेवंविधा अल्पाः कार्यं तैरपि चिन्तनम् ।।१६५

फसती ना फसविती अंधश्रद्ध असूनही
अशा अल्पजनांनीही करावे खोल चिंतन ।।१६५

165) There are some people who are superstitious but who neither deceive others nor themselves get deceived. But such people are very few and they too deserve to do self-retrospection.

वैयक्तिका पुनर्नैषा चान्धश्रद्धावशंगतिः ।
सामाजिकेयं विकृतिर्वर्धमाना दिने दिने ।। १६६

अंधश्रद्धा पुन्हा नाही व्यक्तिसीमित केवळ
सामाजिक तिचे रूप वर्धमान सदोदित ।।१६६

166) The effect of superstitious mentality is not again restricted to individuals. It is a social vice gaining ground day by day.

विहायाध्ययनं छात्रैः स्वकर्तव्यं जनैस्तथा ।
कालोऽपवाह्यते दीर्घो देवदर्शनकाङ्क्षया ।।१६७

अभ्यास सोडुनी छात्र, कर्तव्ये सोडुनी जन
अमोल काळ दवडीत देवद्वारात तिष्ठती ।।१६७

167) The students give up their studies, and the grown up ones their duties and they waste long hours in waiting for bowing to the god in temples.

नवरात्राद्युत्सवेषु भक्ता गायननर्तने ।
ध्वनिक्षेपकयोगेन पीडयन्ति भृशं जनान् ।। १६८

गायनी नर्तनी भक्त नवरात्रादि उत्सवी
ध्वनिक्षेपक लावून पीडिती बहुतां जनां ।।१६८

168) In festivals like ‘Navaratra’, the devotees keep on singing and dancing and immensely torture the people with their loud speakers.

कलाक्रीडापरीक्षासु कार्येषु यशसे जनैः ।
अनादृत्य श्रमं मन्त्रतन्त्रादिरुपयुज्यते ।। १६९

कला-क्रीडा-परीक्षांत कामात यश लाभण्या
श्रम सोडून, मंत्राचा तंत्राचा करित वापर ।। १६९

169) People disbelieve in efforts and resort to hymns or mystical techniques in order to achieve success in arts, sports, exams or their business.

स्वमानवत्वं विस्मृत्य बुद्धिसम्पत्तथाऽऽत्मनः ।
निर्बुद्धा इव वर्तन्ते जनास्तददतिदुःखदम् ।।१७०

विसरून मनुष्यत्व बुद्धिमत्ताहि आपुली
बुद्धिहीनापरी लोक वागती , हे व्यथाकर ।।१७०

170) It is very painful to see that people forget their humanity, their intelligence and behave like brainless creatures.

अन्धश्रद्धजनानां च सर्वं तनुमनोधनम् ।
शोषयन्ति शठा धूर्ता ये हि स्वार्थपरायणाः ।।१७१

अंधश्रद्धा-अंकितांचे सारे तनमनोधन
स्वार्थी, लुच्चे, बुवाबाबा हातोहात लुबाडती ।।१७१

171) The cunning and selfish swindlers rob the superstitious people of their health, wealth and property.

वणिजो मन्त्रिणश्चोराः स्वार्थसाधनतत्पराः
दुर्वर्तनेन सहितं भजन्ते देवतान् गुरून् ।।१७२

पुढारी, शेठजी, चोर, स्वार्थसाधनतत्पर
करताना दुराचार देवधर्मही पाळती ।। १७२

172) Some businessmen, statesmen and robbers intent upon seeking their selfish goals, are seen to cheat the people on one hand and try to please the deities and their spiritual guides, on the other.

ये विश्वसन्ति देवानां सामर्थ्ये फलदायके ।
दुराचरणकाले ते कथं तेभ्यो न बिभ्यति ?१७३

देवकृपेवरी ज्यांचा असा विश्वास ते कसे
भिती न ईश्वरी कोपा, करिता दुष्ट वर्तन ? १७३

173) A question arises as how do the same people who believe god for his power to grant favour, not get scared of his power also to punish the evil , while they are misbehaving?

असत्याः सर्वा एवैताः कल्पना ईश्वरादयः ।
इति भक्तब्रुवा एते प्रायशो जानतेतमाम् ।।१७४

म्हणोनी देव वा त्याच्या कृपाकोपादि कल्पना
असत्य असती, हे, ही मंडळी पूर्ण जाणती ।।१७४

174) Perhaps these crooks posing as devotees of god, know it for certain that god does not exist.

अन्धश्रद्धामतस्त्यक्त्वा दैववादं तथैव च ।
प्रयत्नवादं स्वीकार्य जीवेम मानवा इति ।।१७५

म्हणून अंधश्रद्धा अन् दैववाद त्यजूनिया
प्रयत्नवादा स्वीकारू, जगू मानवसदृश ।।१७५

175) Hence, let us discard all superstitions and fatalism and resolve to lead a life of human beings based on endeavour.

## २५) प्रयत्नवादः -

पञ्चेन्द्रियैर्यथाशक्ति स्वयमेव प्रयत्नतः ।
तथा गुरुभ्योऽनेकेभ्यो नरो ज्ञानमवाप्नुयात् ।।१७६

ज्ञानमेतत्, स्वबुद्धिश्च, गुरुभिः सह मन्त्रणा ।
यदृच्छा (संयोगः) स्वप्रयत्नाश्च पञ्चाधीनं यशो नृणाम् ।।१७७

कृपा वाऽवकृपा तत्र कस्यचिन्नैव कारणम् ।
गुरु-देव-स्तोत्र-पूजादयस्तत्र हि निष्फलाः ।।१७८

'आत्मैव ह्यात्मनो बन्धुरात्मेव रिपुरात्मनः' ।
गीतावाक्यमिदं नित्यं संस्मरेत् बुद्धिमान्नरः ।।१७९

'ईषदेव सुखं धात्रा मद्भाग्ये लिखितं खलु '।
इति मत्वा नरः स्वस्थो नैव तिष्ठेत् कदाचन ।।१८०

## २५) प्रयत्नवाद -

पंचेंद्रिये यथाशक्ती प्रयत्न करुनी स्वता
मिळवावे नरे ज्ञान गुरूंपासून पुष्कळ ।।१७६

ज्ञान, बुद्धी, यदृच्छाही, वार्तालाप गुरूंसवे
आणि प्रयत्न हे पाच यशादींचे नियामक ।।१७७

कृपा वा रोष कोणाचा यशादींचे न कारण
मंत्रे,तंत्रे,जपे,यज्ञे यशप्राप्ति न होतसे ।।१७८

'बंधूहि आपुले तैसे, वैरी आपण आपुले'
गीतावचन हे राहो मौलिक स्मरणी सदा ।।१७९

'इतुकेच विधात्याने ललाटी लिहिले सुख'
असे मानून कोणीही कधी स्वस्थ बसू नये ।।१८०

## 25) **<u>The principle of efforts</u>** –

176) Man should obtain as much knowledge as possible from various teachers as well as by his own efforts, using all his senses.

177) This knowledge, his intelligence, counselling with the elderly people, his efforts and coincidence – these five are the determinants of his success.

178) The favour or disfavour of anybody has nothing to do with it; and gurus, gods, worships or recitation of hymns etc. are of no avail there.

179) The intelligent man should forever remember the maxim from 'Geeta' that one is oneself the saviour or the destroyer of oneself.

180) A man should never sit silent thinking, "The Providence has written only this much happiness in my lot."

विपद्वशमनागत्य प्रयत्नाः पुरुषलक्षणम्
आरोहेदापदां शीर्षं श्रीकृष्णः कालियं यथा ।।।१८१

विघ्नां न जाता शरण प्रयत्नांनी अखंडित
तयां शरण आणावे श्रीकृष्णे कालिया जसे ।।१८१

181) It does not behove a 'Man' to surrender before the adversities and accept them as astroke of hardluck and give up all efforts.

दैवलीलेयमित्युक्त्वा प्रयत्नपरिवर्जनम् ।
निःसत्वो दुर्दशाग्राहः पुरुषस्य न शोभते ।।१८२

दैवी लीला म्हणोनीया प्रयत्नपरिवर्जन
मूक स्वीकार दैवाचा पुरुषास न शोभतो ।।१८२

182) Efforts, and not falling a prey to the idea of adverse luck, is the sign of a human being. He must plant his foot on the head of adversities just as Shrikrishna did on the head of Kaliya.

## २६) सत्यनिश्चये अन्वेषणतत्त्वस्य महत्त्वम् -

## २६) सत्याचा शोध घेताना अन्वेषणाचे महत्त्व –

## 26) __The significance of research in the search of truth__ –

विश्वोत्पत्तिगतिव्याप्तावज्ञानाद्वाऽन्यकारणात् ।
सत्यज्ञानार्जनात्पूर्वं वर्तन्ते बहुकल्पनाः ।।१८३

विश्वोत्पत्ती-स्थिती-नाशासंबंधी ज्ञान सम्यक
होण्याआधी जगामध्ये नाना आहेत कल्पना ।।१८३

183) On account of ignorance or other reasons, numerous theories exist in respect of the origin, continuance and the scope etc. of the universe before the exact truth about these is known.

विशालमेकतो विश्वं सूक्ष्मं चापि तदन्यतः ।
एतयोरान्तरं ज्ञानं गूढं चापारमेव च ।। १८४

जसे विशाल हे विश्व, तसे सूक्ष्महि ते असे
याचे ज्ञान असे जितके गूढ, तितके ते अपारही ।।१८४

184) On one hand the universe is too vast and on the other it is too minute to comprehend. Its working is extremely complicated to understand completely.

अन्वेषणप्रयोगाभ्यां तस्यान्तं गम्यते शनैः ।
विज्ञानं शरणं तत्र न शब्दो न श्रुतिस्मृती ।।१८५

अनुमाने व प्रयोगे कळते ते हळूहळू
त्याचे साधन विज्ञान, नाही शब्द, श्रुती, स्मृती ।।१८५

185) The truth about it is very slowly realized by means of research and experiments. Science is the only succor in this regard. No Vedas, scrip-tures or the word of any authority is useful there.

यथा यथा तु शास्त्रज्ञैः क्रियतेऽन्वेषणं तथा ।
एतद्विषयकं सत्यं ज्ञायते चाधिकाधिकम् ।।१८६

शास्त्रज्ञ करिती जैसे संशोधन तसे तसे
जाणवे सत्य विश्वाचे क्रमाने अधिकाधिक ।।१८६

186) As the scientists keep on conducting rese-arch, more and more truth about it, is understood.

यत्किञ्च धर्मग्रन्थैर्वा पूर्वाचार्यैर्निवेदितम् ।
तत्तत् प्रमाणं मन्यन्ते गतानुगतिकाश्चिरम् ।।१८७

जे काही धर्मग्रंथांनी, पूर्वसूरीनी मांडिले
ते ते परंपरावादी सत्य मानून चालती ।।१८७

187) But those who go by tradition alone, regard it as eternal truth, whatever is stated by former scriptures and authorities.

शतकान्तरपूर्वा ये विधानाः स्थापिता इह ।
साधनैरप्यपर्याप्तैरस्माकं पूर्वजैः खलु ।।१८८

अनेक शतकापूर्वी अपुऱ्या साधनांनिशी
आपल्या पूर्वजांनी जे येथ सिद्धांत मांडले ।।१८८

महत्प्रशंसामर्हन्ति प्रज्ञागाम्भीर्यदर्शनात् ।
तथापि ते कथं सर्वे भवेयुः सत्यमन्तिमम् ।।१८९

कौतुकास्पद ते सारे प्रज्ञेच्या गूढतेमुळे
तथापि ते कसे सारे ठरावे सत्य अंतिम ? १८९

188,189)
The theories which were propounded hundreds of years ago, by our anscestors, even without adequate means, certainly deserve all praise, due to the depth of their insight. But how will those theories prove to be the ultimate truth ?

कतिचित् तु विधानानि ह्येतेषां पूर्वसूरिणाम् ।
प्रयोगैः साधनैर्नूत्नैश्छक्यन्ते भवितुं मृषा ।। १९०

विधाने पूर्वसूरींची यापैकी अल्पशी तरी
असत्य ठरणे शक्य, प्रयोगे, साधने नव्या ।।१९०

190) At least some of the statements made by these anscient thinkers are likely to be proved false in the light of the results of experiments con- ducted with the help of modern techniques and new knowledge not available in the olden times.

अद्य यत् गृह्यते सत्यं तदसत्यं क्वचित् श्वः ।
यथा न्यूटनसिद्धान्तः पश्चान्मिथ्याऽभवत्तथा ।।१९१

आज जे वाटते सत्य, उद्या खोटे ठरू शके
जसे न्यूटन-सिद्धांत पुढती ठरले तसे ।।१९१

191) What is accepted as truth today can, sometimes, be untruth tomorrow, just like some of the theories of Newton.

अन्वेषणविधौ नित्यमनिवार्यो ह्ययं क्रमः।
अतः केचन सिद्धान्ताः काले मिथ्या भवन्त्यपि।१९२

संशोधन-प्रक्रियेत अटळ क्रम हा असे
म्हणून काही सिद्धांत होती अग्राह्य मागुती ।।१९२

192) Such events are inevitable in the process of research. Some theories do become invalid in the long course of time.

यस्मादन्वेषणं नामाऽखण्डाऽनन्ता च प्रक्रिया ।
ततोऽ 'न्तिममिदं सत्य' मिति वक्तुं न शक्यते ।।१९३

संशोधन-प्रक्रियेला खड ना अंत ना असे सत्य
'अंतिम' हे ऐसे यामुळे चूक मानणे ।।१९३

193) Research is thus an incessant and unending process. So nothing can be claimed to be ultimate truth.

वास्तवेन विरुद्धा चेत् कल्पना प्रथमं कृता।
रम्या भव्याऽथ वा दिव्या त्यक्तव्या सा विवेकतः१९४

पूर्वीची कल्पना काही, वास्तवाशी विसंगत
रम्य वा भव्य वा दिव्य, विवेके सोडणे बरे।।१९४

194) If an earlier idea, howsoever grand, smart or 'divine', is opposed to the FACTS, it must be judiciously discarded.

बहवो जीर्णसिद्धान्ता ह्रदा स्तब्धजला इव ।
अवरुद्धगतिं प्राप्य जायन्तेऽनुपयोगिनः ।।१९५

अनेक जीर्ण सिद्धांत साचल्या डबक्यापरी
गतिहीन बनोनी ते, उपयोगी न राहती ।।१९५

195) Many old theories become obsolete just as pools with coagulated water, cease to function.

नवज्ञानेन सत्यस्य बाध्यन्ते पूर्वकल्पनाः ।
तथापि मूढैस्तत्त्यागः क्रियते न दुराग्रहात् ।।१९६

नवीन सत्यज्ञानाने त्याज्य ज्या पूर्वकल्पना
दुराग्रहे त्यां निर्बुद्ध,उराशी कवटाळिती ।।१९६

196) With the new knowledge about truth, the old ideas get disproved. But they are not discarded by the adamant fools.

विज्ञानविमुखीभूत्वा ऽऽश्रयेत् यत्तु परम्पराम् ।
राष्ट्रं तद् प्रगतिं हित्वा विनाशं गच्छति ध्रुवम्।। ।।१९७

विज्ञाना विमुखी होत पाळते जे परंपरा
राष्ट्र ते प्रगतीशून्य, नष्ट होणार निश्चये ।।१९७

197) That nation which becomes averse to science and sticks to tradition ceases to progress and marches towards complete ruin.

विज्ञानाभिमुखीभूत्वा परिवर्तेत यच्चिरम् ।
अद्ययावच्च तद् भूत्वा राष्ट्रं प्रगतिमाप्नुयात् ।।१९८

विज्ञानाभिमुखी होत परिवर्तनशील जे
अद्ययावत ते राष्ट्र साधेल प्रगती महा ।।१९८

198) On the other hand, that nation which welcomes science and keeps on changing constantly, accordingly, becomes up-to-date and thrives.

एवं स्वातन्त्र्यवीरैर्यो विचारः प्रतिपादितः ।
'सत्य एवे'ति स ग्राह्यः 'शब्दस्तस्ये'ति मा पुनः ।।१९९

असा स्वातंत्र्यवीरांनी मांडिला सुविचार जो
'सत्य तो' म्हणुनी ग्राह्य, 'तयांचा' म्हणुनी नव्हे ।। १९९

199) This concept advocated by the 'Freedom-fighter' deserves to be accepted, not because it is advocated by him but because it it is correct.

## २७) उपसंहारः -

अन्धश्रद्धापरित्यागः, पुरुषस्त्रीसमानता ।
जात्यादिभेदोच्छेदश्च कुटुम्बस्य नियोजनम् ।।२००

विज्ञाननिष्ठा, ज्ञानस्य प्रसारः सकले जने ।
अन्वेषणमविश्रान्तं, श्रमयज्ञो निरन्तरः ।।२०१

वैभवं भारतस्यास्य यदि काङ्क्षामहे वयम् ।
ईदृशानि व्रताणीहानुष्ठेयानि विनालसम् ।।२०२

कर्मणो निश्चितं श्रेयो 'निष्कामादात्ममोक्षदात्' ।
तत् कर्म यद्भवेन्नित्यं मानवार्थे ध्रुवं हितम् ।।२०३

उगमो विस्तरश्चैव परिणामा भयावहाः ।
अन्धश्रद्धागता अत्र प्रोक्ता विस्तरशो मया ।।२०४

आवश्यकस्तदुच्छेद इति चापि निरूपितम् ।
विचारोच्चार आचारः प्रचारस्तस्य चिन्त्यताम्। २०५

## २७) उपसंहार –

अंधश्रद्धापरित्याग, पुरुषस्त्रीसमानता
जात्यादिभेद-उच्छेद, कुटुंबाचे नियोजन ।।२००

विज्ञाननिष्ठा, ज्ञानाचा प्रसार सकलां जनी
संशोधन अविश्रांत, श्रमयज्ञ निरंतर ।।२०१

प्रगती भारताची या असे जर अपेक्षित
अशा व्रतांचा स्वीकार व्हावा आळस सोडुनी ।।२०२

'निष्काम', 'मोक्ष देणाऱ्या' कर्माहून असे बरे
ते कर्म जे असे योग्य मानवाच्या हितास्तव ।।२०३

आरंभ अंधश्रद्धेचा, विस्तार जनमानसी
परिणाम तसे घोर, वर्णिले मी सविस्तर ।।२०४

अंधश्रद्धाविनाशाची जरूरी कथिली तिचा
करा विचार, आचार , प्रचार, पटले तर! ।।२०५

## 27) **Conclusion** -

200 – 202) If we sincerely desire our nation to prosper, we must deligently accept vows like total renunciation of superstitions, equality between men and women, annihilation of distinctions like caste etc., family planning, scientific attitude, spread of knowledge among masses, ceaseless research and continuous hardwork, etc.

203) An activity which is conducive to human wel-fare is decidedly superior to actions 'aiming at no fruit', and so 'leading to one's own salvation'.

204) I have tried to explain in detail, in my opinion, the origin, spread and the dire consequences of superstitions.

205) I have also tried to urge upon the readers the need to uproot them. I request them, therefore, to think it over, to practise it and to preach it if they are convinced of it.

पठित्वेदं चिन्तयन्तु समाजस्य हितैषिणः ।
विज्ञापयेऽहं दातारः सीतारामः पुनःपुनः ।।२०६

पठित्वेदं विचाराय प्रवृत्ता यदि वाचकाः
क्लेशो मे सफलो भूत्वा नवतां भूय एष्यति ।।२०७

– – ० – –

करोत मनना सारे समाजहितचिंतक
दातार मी विनवितो सीताराम पुन्हा पुन्हा ।।२०६

वाचून हे विचाराला होती प्रवृत्त वाचक
तर माझे लागतील सार्थकी श्रम अल्पसे ।।२०७

– – ० – –

206) I earnestly entreat those who care for the good of the society, read the above treatise and give a thought to it.

207) If the readers of this bunch of thoughts are prompted to ponder over the problem pronounced in it, my efforts will be rewarded with renewed energy.

(15 – 06 - 2010)

Prof. S.B.Datar, 103, Abhiyan CHS,
Jeevan Vikar Kendra Marg,
Andheri (East), Mumbai 400 069.
Email : sbd1934@gmail
Tel – (landline) - (022) 2684 0341 Tel – (Mobile) - 0 98335 45110